

॥ श्री नरसिंह जी स्तोत्र ॥

श्री नरसिंह मन्त्रराजपद स्तोत्रम्

पारंपरिक संस्कृत पाठ • फलश्रुति सहित १२ श्लोक

Full Disclaimer

This book is for educational, inspirational, and cultural purposes only. The remedies, rituals, affirmations, breathing methods, and spiritual practices described are based on traditional beliefs, historical customs, and personal development principles. They are not guaranteed solutions.

This book does not replace advice from licensed doctors, psychologists, financial advisors, lawyers, or other qualified professionals. If you have medical symptoms, mental health concerns, legal matters, or financial risk, seek professional help.

Use all remedies responsibly, ethically, peacefully, and according to local law. Do not use fire, herbs, fasting, incense, or physical practices in unsafe ways. The author and publisher are not liable for misuse.

Results in life depend on effort, discipline, timing, environment, skill, and many other factors. No spiritual method guarantees money, marriage, success, healing, or protection.

Hargharpanditji
"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"

॥ श्री नरसिंह जी स्तोत्र ॥

श्री नरसिंह मन्त्रराजपद स्तोत्रम्

॥ श्री ईश्वर उवाच ॥

वृत्तोत्फुल्लविशालाक्षं विपक्षक्षयदीक्षितम् ।
निनादत्रस्तविश्वाण्डं विष्णुमुग्रं नमाम्यहम् ॥ १॥

सर्वैरवध्यतां प्राप्तं सफलौघं दितेः सुतम् ।
नखाग्रैः शकलीचक्रे यस्तं वीरं नमाम्यहम् ॥ २॥

पादावष्टब्धपातालं मूर्धाऽऽविष्टत्रिविष्टपम् ।
भुजप्रविष्टाष्टदिशं महाविष्णुं नमाम्यहम् ॥ ३॥

ज्योतींष्यर्केन्दुनक्षत्रज्वलनादीन्यनुक्रमात् ।
ज्वलन्ति तेजसा यस्य तं ज्वलन्तं नमाम्यहम् ॥ ४॥

॥ जय श्री नरसिंह ॥

॥ श्री नरसिंह जी स्तोत्र ॥

श्री नरसिंह मन्त्रराजपद स्तोत्रम्

सर्वेन्द्रियैरपि विना सर्वं सर्वत्र सर्वदा ।
जानाति यो नमाम्याद्यं तमहं सर्वतोमुखम् ॥ ५॥

नरवत्सिंहवच्चैव रूपं यस्य महात्मनः ।
महासटं महादंष्ट्रं तं नृसिंहं नमाम्यहम् ॥ ६॥

यन्नामस्मरणाद्भीताः भूतवेतालराक्षसाः ।
रोगाद्याश्च प्रणश्यन्ति भीषणं तं नमाम्यहम् ॥ ७॥

सर्वोऽपि यं समाश्रित्य सकलं भद्रमश्नुते ।
श्रिया च भद्रया जुष्टो यस्तं भद्रं नमाम्यहम् ॥ ८॥

॥ जय श्री नरसिंह ॥

॥ श्री नरसिंह जी स्तोत्र ॥

श्री नरसिंह मन्त्रराजपद स्तोत्रम्

साक्षात्स्वकाले सम्प्राप्तं मृत्युं शत्रुगणानपि ।
भक्तानां नाशयेद्यस्तु मृत्युमृत्युं नमाम्यहम् ॥ ९॥

नमस्कारात्मकं यस्मै विधायात्मनिवेदनम् ।
त्यक्तदुःखोऽखिलान् कामानश्नुते तं नमाम्यहम् ॥ १०॥

दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः ।
अतोऽहमपि ते दास इति मत्वा नमाम्यहम् ॥ ११॥

॥ फलश्रुतिः ॥

शङ्करेणादरात्प्रोक्तं पदानां तत्त्वमुत्तमम् ।
त्रिसन्ध्यं यः पठेत्तस्य श्रीर्विद्याऽऽयुश्च वर्धते ॥ १२॥

॥ इति श्रीनरसिंहमन्त्रराजपदस्तोत्रं सम्पूर्णम् ॥